# वाक्यविचारदृष्ट्या कात्यायनवार्तिकानुशीलनम्

**डॉ० भगवन्नारायण मिश्रः**

व्याकरणविभागः

धर्मसमाज- संस्कृतमहाविद्यालयः

मुजफ्फरपुरम्- 842002 (बिहारः)

सार्थकशब्दानां पदानां वा समूहः वाक्यमुच्यते, वाक्ये यावन्ति पदानि समायान्ति तानि सर्वाणि परस्परं स्वकीयं सम्बन्धं विस्पष्टीकृत्य एव चलन्ति तथा सहैव कमपि अर्थमभिव्यञ्जन्ति, सम्पूर्णः वाग्व्यवहारः वाक्ये एव भवति । अयं तु सामान्यतया मानवस्वभावः यत् प्रत्येकं जनः यत् किञ्चिदपि वक्तुमभिलषति तत् स्वल्पतरैः एव शब्दैः कथयति किन्तु तस्य तात्पर्यं पूर्णतः वाक्यात्मकं तिष्ठति । यदा कदा समयाभावे यथोचितशब्दभाण्डागारस्याभावेऽपि मनुष्यः स्वल्पातिस्वल्पशब्दानां प्रयोगाय विवशः संजायते किन्तु शब्दानामभावेऽपि तस्य समग्रकथनस्य तात्पर्यं वाक्यमूलमेव भवति ।

प्रत्येकं वाक्यस्य द्वौ भागौ भवतः उद्देश्यं विधेयञ्च, वाक्ये त्रीणि तत्वानि भवन्ति-वक्ता, सम्बोध्यः ...वश्च । सर्वासां भाषाणां परीक्षणेन ज्ञायते यत् यानि कान्यपि वाक्यानि अभिधीयन्ते तेषां कोऽपि वक्ता भवति, ...क्तृतत्त्वमेव इदं विशिनष्टि यत् कः जनः कं प्रति किं कथयति तथा श्रोत्रा सह तस्य कः सम्बन्धः भवति । ...म्बोध्यत्वेन श्रोतृत्वेन च इदं निश्चीयते यत् श्रोतुः योग्यता, अवस्था तथा प्रकृतिः किंविधा तिष्ठति एवञ्च तं प्रति ...: शब्दैः कया शैल्या च अभिधानं समुचितं भविष्यति येन तदुपरि तस्य समुचितः प्रभावः समुपपद्येत । ...वतत्वान्तर्भूतं तस्य सम्पूर्णविषयस्य, भावस्य परिस्थित्याश्च समावेशः भवति यस्य वक्ता तं सम्बोध्य कथयितुमिच्छति । ...नां त्रयाणां तत्वानामेव संयोगात् वाग्व्यापारस्य प्रयोगपद्धतिः वाक्यरचना वा सुनिश्चिता भवति ।

भाषाणां जातीनां च पारस्परिकसम्पर्ककारणात्, विभक्तिलोपतः, इच्छितार्थस्य संक्रमणप्रवृत्तितः नवीनायाः ...या अभिधानस्य सरणिविशेषेण श्रोतुःबुद्धिश्च, वक्तुः पाण्डित्यानुसारं च वाक्यानां रूपेषु परिवर्तनं संजायते । ...कृतभाषाशास्त्रविचक्षणैः वाक्यस्य स्वरूपविवेचनं बहुशः कृतम्। वस्तुतः वाक्येषु भावानामभिव्यक्तिरेव भाषा । ...कृतवैयाकरणानामभिमतं वर्तते यत् पदेभ्यः शब्देभ्यः वा अर्थः न निस्सरति प्रत्युत वाक्यतः अर्थस्य निर्गमनं ...ते । अतएव वाक्यमेव कूटस्थं सत्यं च अस्ति वाक्यस्फोट एव अर्थाभिधाने अर्थसमाप्तौ च समर्थः भवति । ...टति प्रकाशते अर्थोऽस्मादिति स्फोटः, स्फुट्यतेऽभिव्यज्यते वर्णैरिति स्फोटो वा । तेन यस्मादर्थाभिव्यक्तिर्जाता ...ते स स्फोट इति सिध्यति ।

स्फोटत्वञ्च-अर्थप्रकाशकत्वम् । सार्थकशब्दस्य द्वौ पक्षौ भवतः ध्वनिः स्फोटश्च । तत्र ध्वनिरनित्यः ...वोऽर्थाभिव्यक्त्यक्षमः । स तु केवलं स्फोटाभिव्यञ्जक एव । ध्वन्यभिव्यक्तस्य स्फोटशब्दस्यात्माऽर्थाभिव्यक्ति- ... । स्फोटोऽसौ मध्यमाविषयः, ध्वनिस्तु वैखरीविषय एव ।

> **परावाङ्मूलचक्रस्था पश्यन्ती नाभिसंस्थिता ।**
> **हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा ॥**
> **वैखर्या हि कृतो नादः परश्रवणगोचरः ।**
> **मध्यमया कृतो नादः स्फोटव्यञ्जक उच्यते ॥**

तत्र महावैयाकरणेन नागेशभट्टेन अष्टौ स्फोटाः भवन्ति इति मन्यते । अतो हि वर्णस्फोटो द्विविधो-वर्णजातिस्फोटः

आवश्यकताया: समुपस्थितावेव उपसर्गनिपातयो: प्रयोग: वाक्ये कार्य: । सर्वाणि द्रव्यपदानि प्रत्यक्षाप्रत्यक्ष क्रियापदै: समन्वितानि भवन्ति अथवा कस्यापि कारकद्रव्यस्य विशेषणरूपेण तन्माध्यमेन किं वा साक्षात् क्रिया विशेषणत्वेन क्रियया अन्वितानि भवन्ति तथा च कात्यायनाचार्य: वाक्यस्य लक्षणं प्रस्तौति-'आख्यातं साव्ययकारकविशे वाक्यम्' । कारकनामपदै: तथा चावश्यकतानुरूपम् उपसर्गनिपातै: युक्तं तिङन्तं क्रियापदं वाक्यं कथ्य यथा-उच्चै: पठति, नीचै: पठति । अत्र एका क्रिया, एकमव्ययं तिष्ठति । ओदनं पचति अत्र एका क्रिया, कर्मकारकं विद्यते । ओदनं मृदु विशदं पचति-अस्मिन् वाक्ये क्रियाकारकम् अव्ययं विशेषणञ्च विद्यते ।

**( 2 ) पदोच्चय:- महा० 2-1-1**

तथा च पर्यवसितान्वये सति योग्यताकाङ्क्षासत्तिमदनेकपदत्वं वाक्यमिति वाक्यलक्षणम् । पदोच्चय: परस्पर वाक्यम् । स च योग्यताकाङ्क्षासत्तियुक्त: चेत् तथा च द्वयो: पदार्थयो: बहूनां वा पदार्थानां परस्परसम्बन्धवि प्रतिबन्धकाभाव: योग्यता तथा च जलेन सिञ्चतीत्यादौ सेचनक्रियायां जलकरणत्वरूपसम्बन्धविषये जल सेचनकार्यकत्वसम्बन्धविषये च प्रतिबन्धकाभावात् वाक्यत्वसिद्धि: । एवं वह्निना सिञ्चतीत्यादौ योग्यताया: अभाव न वाक्यत्वम् । एवं श्रोतु: यत् किञ्चित् पदश्रवणसमनन्तरमेव तदन्वयिपदान्तरश्रवणेच्छा आकाङ्क्षा इति कथ्यते एवञ्च जलेन सिञ्चतीत्यादौ श्रोतु: जलेन इति पदश्रवणसमनन्तरमेव सिञ्चतीति पदश्रवणेच्छा जायते । निराकाङ्क्ष वाक्यत्वे गौरश्व: पुरुषो हस्तीत्यादीनामपि वाक्यत्वं स्यात् । तथा कालव्यवधानेन अनन्वयिपदान्तरेण वा अविच्छि पदप्रतीतिप्रवाह: आसत्ति: कथ्यते । एवञ्च जलेन सिञ्चतीत्यादौ तादृशप्रतीतिप्रवाहसत्वात् आसत्तेरपि सत्वे वाक्यत्वम् । आसत्ते: अभावेऽपि वाक्यत्वे इदानीम् उच्चरितस्य देवदत्तशब्दस्य दिनान्तरोच्चारितेन खादतीति पदे संगति: स्यात् । आकाङ्क्षा इच्छारूपा सा च समवायसम्बन्धेन आत्मनि तिष्ठेत् । योग्यता च अर्थे तिष्ठेत् तो पदोच्चयधर्मत्वं कथम् ? तथा च उत्थापकत्वनिवर्तकत्वान्यतरसम्बन्धेन आकाङ्क्षायुक्तत्वं पदोच्चयस्य अङ्गीकृतम्

**( 3 ) सक्रियाविशेषणञ्च ( महा० 2.1.1 )**

वाक्यस्योपर्युक्ते लक्षणे क्रियाविशेषणस्यापि सन्निवेश: विधातव्य: यथा-सुष्ठु पचति, दु:पचति अत्र सु दु:-दु:खेन इति क्रिया विशेषणं तिष्ठति । सविशेषणमित्येव क्रियाविशेषणेऽपि सिध्यति । अत आह कैयटाचार्य: प्रत्यासत्त्या कारकस्यैव यद् विशेषणं तद् गृह्यते, न तु क्रियाया: आख्यातेन च क्रियाप्रधानत्वं लक्ष्यते इ अतिङन्तेष्वपि देवदत्तेन शयितव्यमित्यादिषु वाक्यत्वं सिध्यति । यदि संक्षिप्तरूपेण वाक्यं परिभाष्येत तदा इदमे कथयितुं शक्यते यत् सविशेषणं तिङन्तं क्रियापदमेव वाक्यं कथ्यते । तथा च कस्याप्यन्यस्याचार्यस्य मतं प्रस्तुव आह भाष्यकार:- अपर आह 'आख्यातं सविशेषणम्' । इत्येव ह्येतानि विशेषणानि । अत्र आख्यातं सविशेषण वाक्यमिति लक्षणं पाणिने: । 'तिङतिङ्' इति पाणिनिसूत्रे अतिङ्ग्रहणं कुर्वत: सूत्रकारस्याभिमतं लौकिकमेव पचा भवतीत्येतत् साधारणम् । तत्र सविशेषणत्वेन विभागे साकांक्षत्वं लब्ध्यम् । तत्र आख्यातपदेन क्रियाप्रधानं लक्ष्यते तेन त्वया शयितव्यमित्यादे: संग्रह: । सविशेषणमित्यस्य साक्षात् परम्परया वा यद् विशेषणं तत्सहितमिति तात्पर्यम् तेन नद्यास्तिष्ठति कूले इत्यादौ नद्या इत्यादे: समानवाक्यस्थत्वसिद्धि: । **पूर्वमीमांसादर्शनेप्येवमेव** विचार:- अर्थैक्यादे वाक्यं साकांक्षेचेद् विभागे स्यात् । **अमरसिंहेनापि** एतदेवाभिप्रेत्य कारकान्वितक्रियावाचकं सुबन्ततिङन्तचयान्यत वाक्यमिति विश्लेषितम् । तथा चोक्तं तेन-

"सुप्तिङन्तचयो वाक्यं क्रिया वा कारकान्विता" । अत्र वाशब्द: चेदर्थे, कारकं च तिङन्तवा तिरिक्तपदवाच्यं वेत्यन्यत् । एकस्य तत्त्ववारणाय सुबन्तचयेत्यादि । एतत् समानार्थकमेवाख्यातमिति स्पष्टमेव देवैकोद्देश्यकैकविधेय- कत्वगर्भमेक-वाक्यलक्षणं बोध्यम् । तदुक्तं **भर्तृहरिणा**-

'साकांक्षावयवं भेदे परानाकांक्षशब्दकम् ।
क्रियाप्रधानं गुणवदेकार्थं वाक्यमुच्यते ॥

पदस्फोटस्त्रिविध:- पदजातिस्फोट:, सखण्डपदव्यक्तिस्फोट:, अखण्डपदव्यक्तिस्फोटश्च। वा
वाक्यजातिस्फोट:, सखण्डवाक्यव्यक्तिस्फोट:, अखण्डवाक्यव्यक्तिस्फोटश्चेति । अखण्डपदवाक्य
त्वात्, जातेश्चानेकसमवेतत्वात् । अत: वाक्यस्फोटे लोकव्यवहारस्य प्रामाण्यम् इति
वाक्ये एव प्रथमं शक्तिग्रहात् वर्णपदयो: स्फोटत्वे व्याकरणशास्त्रमेव प्रमाणम् । व्याकरण
दनेन वर्णस्य स्फोटत्वसिद्धि:, प्रकृतिप्रत्ययौ तत्तदर्थवाचकौ इति वर्णस्फोट इत्यस्य हि तात्पर्य
कृतिप्रत्ययभागपरत्वात् । प्रकृतिप्रत्ययभागव्युत्पादनद्वारा पदव्युत्पादनमिति पदस्फोटस्यापि सिद्धि
यत् वाक्यादेवार्थबोधो भवतीति वैयाकरणा: मन्यन्ते, अनुभवन्ति सर्वे बोद्धारोऽपि केव
भवितुमर्हति तत्रापि कर्तृकर्मणोरध्याहार: सम्भाव्यत एव । एषां कर्तृकर्मक्रियापदानां संस्कृतभाषा
योजनमिति नैष नियम: आनय जलम्-जलमानय, इत्युभयं हि तत्र दृश्यते । विभिन्नासु भाषा
मश: सन्निवेशस्य नियम: परमावश्यकत्वेन तिष्ठति । तासां भाषाणां वाक्यरचनासु
यते तदा अर्थबोधे काठिन्यमथवा अर्थावबोधे अशक्यत्वं तूपपद्यत एव, सम्पूर्णं वाक्य
नभाषायां वाक्यस्य प्रारम्भे कर्तृपदं, तदनन्तरं क्रियापदम् अन्ते च कर्मपदं तिष्ठति
रम्भे, कर्मपदं मध्ये अन्ते च क्रियापदं तिष्ठति । सर्वत्र क्रमभङ्गस्य परिहार: आवश्यक ए
स्मिन् विषये स्वातन्त्र्यं तिष्ठति, क्वापि कर्तृकर्मक्रियापदानां व्यवस्था भवितुमर्हति । कि
आनुपूर्व्या: आवश्यकता तिष्ठत्येव । विषयस्यास्य सुष्ठूपस्थापनं महाभाष्ये दृश्यते-

नविष्टानां यथेष्टमभिसम्बन्ध: शक्यते कर्तुम् । न चैतान्यानुपूर्व्येण सन्निविष्टानि अनानुपूर्व्येणा
सम्बन्धो भवति । तद्यथा 'अनड्वाहमुदहारि या त्वं हरसि शिरसा कुम्भं भगिनि
' । तस्य यथेष्टमभिसम्बन्धो भवति उदहारि भगिनि या त्वं कुम्भं हरसि शिरसा अनड्वा
: इति । यत्तु भगवता पूर्वमुक्तं यत् कयापि आनुपूर्व्या विनिवेशितानामेव शब्दानां परस्प
शक्यते, तत्तु स्पष्टत: संस्कृतवाक्येष्वपि क्रमसन्निवेशस्य आवश्यकतां विशिनष्टि, या
मेण वा विरहितानामपि शब्दानां वक्तु: इच्छया यथेष्ट: सम्बन्ध: उपपद्यते । तद्यथ
पदानां कापि आनुपूर्वी न तिष्ठति, इमानि पदानि यथोचितक्रमेण न विनियोजितानि
वक्तीयबुद्ध्यनुरूपमेतेषां यथोचितानां समन्वितिं विधाय एव संयोजयन्ति- उदहारि भगिनि
त्रापि सूक्ष्मविश्लेषणेन इदमेव विज्ञायते यत् आनुपूर्वीरहितेषु वाक्येषु क्लिष्टत्वदोषयुक्त
तदपि तदैव भवति यदा वक्ता श्रोता वा तद्वाक्यं स्वीयबुद्ध्या क्रमपूर्वकं सन्नियोज्यैव
संस्कृतवाक्येष्वपि आनुपूर्व्या: आग्रह: तिष्ठत्येव ।

रूपज्ञानाय शब्दत: पदतो वा एतस्य सम्बन्ध: प्रथमं ज्ञेय: । भाषाया: आधारभूत: शब्द:
स्य भाषारूपस्यास्य माध्यमस्य आधार: साधनं वा शब्द एव वर्तते । यथा चोक्तम्-

**वारि वाक् परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिण: ।**
**त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति ॥**

ये कृते शब्द इति शब्दस्तोममहानिधौ व्युत्पादित: शब्द:, मैत्रेयस्तु शब्द शब्दक्रियायामिति
प्रारम्भिक: अर्थ: ध्वनि: स्वन: वा वर्तते । ध्वनिरयं द्विविध: प्रथमस्तु सम्यक्करणैरुपहिते
भवति तथा चापर: स्थानकरणाभ्यां पुरुषप्रयत्नेन उच्चारित: व्यक्तध्वनि: शब्द: अयं
पुरुषप्रयत्न: स आदौ येषां स्थानादीनां ते संध्यादय: तान् प्राप्य वाग्भवति, वर्णो
र्ववर्णानां तस्य रूपान्यत्वे वर्णान्यत्वम् । एकस्य वर्णस्य वर्णानां वा समुदाय: अक्षरं
जा । एकस्य वर्णस्य एकस्य अक्षरस्य अनेकेषां वर्णानामक्षराणां वा संघात: समुदायो
शब्दो तान उत्पत्ति: । तथा च कौटिलीये अर्थशास्त्रे वर्णसंघातजं पदम् ।

**शुक्लयजु:प्रातिशाख्ये** अक्षरसमुदाय: पदम् अक्षरं वा । आचार्य: इन्द्र: पदस्योपर्युक्तां व्युत्पत्तिसंरचनामूलकामेव मनुते तथा पदत्वस्य तदाधार: वर्तते अर्थ:-'अर्थ: पदमन्त्राणाम्' । यस्यैकस्य वर्णस्य अक्षरस्य अनेकेषां वर्णानामक्षराणां वा समुदाय: पदं कथ्यते । लोके पदार्थबोधक एव शब्द: 'प्रतीतपदार्थको लोके ध्वनि: शब्द:' इति **पातञ्जलमहाभाष्ये । शृङ्गारप्रकाशे** च -'येनोच्चारितेनार्थ: प्रतीयते स शब्द:' । वस्तुत: शब्दस्य पदस्य चार्थे वैषम्यं तिष्ठति । सामान्यत: शब्द: प्रातिपदिकस्य पर्यायरूप: तथा च **कात्यायनेन** स्वीकृतम्-न वा पदस्यार्थप्रयोगात्' । अस्य विश्लेषणक्रमेण **भाष्यकार** आह-"न वा एष पक्ष एवास्ति प्रातिपदिकानामेकशेष इति । किं कारणम्? पदस्यार्थे प्रयोगात् । पदमर्थे प्रयुज्यते विभक्त्यन्तं च पदम् । रूपं चेहाश्रीयते । रूपनिर्ग्रहश्च शब्दस्य नान्तरेण लौकिकं प्रयोगम् ।" स: शब्द: पदं कथ्यते तत्र विभक्ति: समन्विता तिष्ठति-सुप्तिङन्तं पदम्, विभक्त्यन्तं च पदम् । एवमपि कथयितुं शक्यते यत् यस्य वाक्ये प्रयोगं कर्तुं शक्य: स शब्द: पदं कथ्यते-'वर्णा: पदं प्रयोगार्हानन्वितैकार्यबोधका:'। शब्दपदयोरयं भेद: अतीव सूक्ष्म: प्रायिकश्च । बहुश: लक्षणया पदशब्दावुभावपि परस्परं पर्यायत्वेन प्रयुज्येते-तेन अनेकार्थाभिधाने यत्नं कुर्वतावश्यं लोक: पृष्ठतोऽनुगन्तव्य: केष्वर्थेषु लौकिका: कान् शब्दान् प्रयुञ्जन्ति इति । अत्र पदार्थे एव शब्द इत्यस्य प्रयोग: । अयं पदशब्द: गत्यर्थकात् पद्धातो: करणे घप्रत्यये कृते निष्पद्यते, पद्यते गम्यतेऽर्थोऽनेनेति पदमिति **बालमनोरमायाम्** यस्याधार: **न्यासकारस्येदं** विश्लेषणं 'पद्यते गम्यतेऽर्थो येन तत् पदम्' । पदमेतत् द्विविधम् एकाक्षरानेकाक्षरभेदात् । तत्र 'अ इ उ' इत्यादय: एकाकिन: वर्णा: एकाक्षरपदत्वेनाभिधीयन्ते एवंभूतानां पदानां समूह: वाक्यं कथ्यते 'पदसंघातजं वाक्यम् ।' **कौटिल्यमते** येन पदसंघातेन प्रतिपाद्यस्य सामग्र्येण प्रतीति: भवेत् स पदसमूहो वाक्यम् कथ्यते 'पदसमूहो वाक्यमर्थपरिसमाप्तौ' । **काशिकाकृतामेकार्थ:** पदसमूहो वाक्यमिति उक्तञ्च **पदमञ्जरीकृन्मते** भगवत: **जैमिने:** वाक्यलक्षणमाधृत्य तिष्ठति-'अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यात्' । इदमेव वाक्यलक्षणं परिचस्कार **विश्वनाथाचार्य:**-'वाक्यं स्याद्योग्यताकाङ्क्षासत्तियुक्त: पदोच्चय:' तथा च पर्यवसितान्वयत्वे सति योग्यताकाङ्क्षासत्तिमदनेकपदत्वं वाक्यमिति । पदोच्चय: पदसमूह: वाक्यम् । स च योग्यता-आकाङ्क्षासत्तियुक्त: चेत् तथा च द्वयो: पदार्थयो: बहूनां योग्यता, तथा च जलेन सिञ्चतीत्यादौ सेचनक्रियायां जलकरणत्वरूपसम्बन्धविषये जले सेचनकार्यकत्वसम्बन्धविषये च प्रतिबन्धकाभावात् वाक्यत्वसिद्धि: । एवं वह्निना सिञ्चतीत्यादौ योग्यताया: अभावेन न वाक्यत्वम् । एवं श्रोतु: यत् किञ्चित् पदश्रवणसमनन्तरमेव तदन्वयिपदान्तरश्रवणे च आकाङ्क्षा इतिकथ्यते । एवञ्च जलेन सिञ्चतीत्यादौ श्रोतु: जलेन इति पदश्रवणसमनन्तरमेव सिञ्चतीति पदश्रवणेच्छा जायते । निराकाङ्क्षस्य वाक्यत्वे गौरश्व: पुरुषो हस्तीत्यादीनामपि वाक्यत्वं स्यात् । तथा कालव्यवधानेन अनन्वयिपदान्तरेण वा अविच्छिन्न: पदप्रतीतिप्रवाह: आसत्ति: कथ्यते एवं च जलेन सिञ्चतीत्यादौ तादृशप्रतीतिप्रवाहसत्त्वात् आसत्तेरपि सत्त्वेन वाक्यत्त्वम् । आसत्ते: अभावेऽपि वाक्यत्वे उच्चरितस्य देवदत्तशब्दस्य दिनान्तरोच्चारितेन खादतीति पदेन संगति: स्यात् । आकाङ्क्षा इच्छारूपा, सा च समवायसम्बन्धेन आत्मनि तिष्ठति । योग्यता च अर्थे तिष्ठति तर्हि पदोच्चयधर्मत्वं कथम् ? तथा च उत्थापकत्व-निवर्तकत्वान्यतरसम्बन्धेन आकाङ्क्षायुक्तत्वं पदोच्चयस्य अङ्गीकृतम् ।

संस्कृतवैयाकरणेषु भाषाशास्त्रमर्मज्ञेषु च वाक्यस्वरूपविषये पूर्वं न केनापि आचार्येण वाक्यस्य स्वरूपं विश्लेषितम् । महर्षिपाणिनिना न कस्मिन्नपि सूत्रे वाक्यस्वरूपं लक्षितम् । अष्टाध्याय्यां केवलं सूत्रद्वये वाक्यशब्दस्य प्रयोग: परिलक्ष्यते-1-**वाक्यादेरामन्त्रितस्यासूयासम्मतिकोपकुत्सनभर्त्सनेषु, 2, 2 वाक्य टे: प्लुत: उदात्त: इति** अन्यत्रापि वाक्यस्वरूपविषये न कोऽपि प्रकाश: तिष्ठति । अत: वाक्यरचनाविषये पाणिनेरनन्तरं कात्यायनकाल पर्यन्तं किम्विधं परिवर्तनं जातमिति विवेचनं कठिनम् । आचार्य: **कात्यायन** एव प्रथम: वैयाकरण: य: सर्वप्रथमं वाक्यं लक्षितवान्, तत्स्वरूपं च विश्लेषितवान् । **महाभाष्ये** एतत्सम्बन्धे वार्तिकानि दरीदृश्यन्ते यानि कात्यायनकालिकसंस्कृतभाषायां वाक्यस्वरूपस्य विश्लेषणं प्रस्तुवन्ति ।

) आख्यातं साव्ययकारकविशेषणं वाक्यम्– महा० 2।1।1।

वाक्ये द्रव्यवाचकपदानां क्रियावाचकपदानाञ्च साक्षाद्रूपेण अर्थत: वा समुपस्थापनमावश्यकम्

आवश्यकतायाः समुपस्थितावेव उपसर्गनिपातयोः प्रयोगः वाक्ये कार्यः । सर्वाणि द्रव्यपदानि प्रत्यक्षाप्रत्यक्ष क्रियापदैः समन्वितानि भवन्ति अथवा कस्यापि कारकद्रव्यस्य विशेषणरूपेण तन्माध्यमेन किं वा साक्षात् क्रिया विशेषणत्वेन क्रियया अन्वितानि भवन्ति तथा च कात्यायनाचार्यः वाक्यस्य लक्षणं प्रस्तौति-'आख्यातं साव्ययकारकविशे वाक्यम्' । कारकनामपदैः तथा चावश्यकतानुरूपम् उपसर्गनिपातैः युक्तं तिङन्तं क्रियापदं वाक्यं कथ्य यथा-उच्चैः पठति, नीचैः पठति । अत्र एका क्रिया, एकमव्ययं तिष्ठति । ओदनं पचति अत्र एका क्रिया, क कर्मकारकं विद्यते । ओदनं मृदु विशदं पचति-अस्मिन् वाक्ये क्रियाकारकम् अव्ययं विशेषणञ्च विद्यते ।

**( 2 ) पदोच्चयः– महा० 2-1-1**

तथा च पर्यवसितान्वये सति योग्यताकाङ्क्षासत्तिमदनेकपदत्वं वाक्यमिति वाक्यलक्षणम् । पदोच्चयः पदसमू वाक्यम् । स च योग्यताकाङ्क्षासत्तियुक्तः चेत् तथा च द्वयोः पदार्थयोः बहूनां वा पदार्थानां परस्परसम्बन्धविष प्रतिबन्धकाभावः योग्यता तथा च जलेन सिञ्चतीत्यादौ सेचनक्रियायां जलकरणत्वरूपसम्बन्धविषये ज सेचनकार्यकत्वसम्बन्धविषये च प्रतिबन्धकाभावात् वाक्यत्वसिद्धिः । एवं वह्निना सिञ्चतीत्यादौ योग्यतायाः अभाव न वाक्यत्वम् । एवं श्रोतुः यत् किञ्चित् पदश्रवणसमनन्तरमेव तदन्वयिपदान्तरश्रवणेच्छा आकाङ्क्षा इति कथ्यते एवञ्च जलेन सिञ्चतीत्यादौ श्रोतुः जलेन इति पदश्रवणसमनन्तरमेव सिञ्चतीति पदश्रवणेच्छा जायते । निराकाङ्क्ष वाक्यत्वे गौरश्वः पुरुषो हस्तीत्यादीनामपि वाक्यत्वं स्यात् । तथा कालव्यवधानेन अनन्वयिपदान्तरेण वा अविच्छि पदप्रतीतिप्रवाहः आसत्तिः कथ्यते । एवञ्च जलेन सिञ्चतीत्यादौ तादृशप्रतीतिप्रवाहसत्वात् आसत्तेरपि सत्वे वाक्यत्वम् । आसत्तेः अभावेऽपि वाक्यत्वे इदानीम् उच्चरितस्य देवदत्तशब्दस्य दिनान्तरोच्चारितेन खादतीति पदे संगतिः स्यात् । आकाङ्क्षा इच्छारूपा सा च समवायसम्बन्धेन आत्मनि तिष्ठेत् । योग्यता च अर्थे तिष्ठेत् तो पदोच्चयधर्मत्वं कथम् ? तथा च उत्थापकत्वनिवर्तकत्वान्यतरसम्बन्धेन आकाङ्क्षायुक्तत्वं पदोच्चयस्य अङ्गीकृतम्

**( 3 ) सक्रियाविशेषणञ्च ( महा० 2.1.1 )**

वाक्यस्योपर्युक्ते लक्षणे क्रियाविशेषणस्यापि सन्निवेशः विधातव्यः यथा–सुष्ठु पचति, दुःपचति अत्र सु दुः-दुःखेन इति क्रिया विशेषणं तिष्ठति । सविशेषणमित्येव क्रियाविशेषणेऽपि सिध्यति । अत आह कैयटाचार्यः प्रत्यासत्त्या कारकस्यैव यद् विशेषणं तद् गृह्यते, न तु क्रियायाः आख्यातेन च क्रियाप्रधानत्वं लक्ष्यते इ अतिङन्तेष्वपि देवदत्तेन शयितव्यमित्यादिषु वाक्यत्वं सिध्यति । यदि संक्षिप्तरूपेण वाक्यं परिभाष्येत तदा इदमि कथयितुं शक्यते यत् सविशेषणं तिङन्तं क्रियापदमेव वाक्यं कथ्यते । तथा च कस्याप्यन्यस्याचार्यस्य मतं प्रस्तुव आह भाष्यकारः- अपर आह 'आख्यातं सविशेषणम्' । इत्येव ह्येतानि विशेषणानि । अत्र आख्यातं सविशेषण वाक्यमिति लक्षणं पाणिनेः । 'तिङतिङ्' इति पाणिनिसूत्रे अतिङ्ग्रहणं कुर्वतः सूत्रकारस्याभिमतं लौकिकमेव पचा भवतीत्येतत् साधारणम् । तत्र सविशेषणत्वेन विभागे साकांक्षत्वं लब्ध्यम् । तत्र आख्यातपदेन क्रियाप्रधानं लक्ष्यते तेन त्वया शयितव्यमित्यादेः संग्रहः । सविशेषणमित्यस्य साक्षात् परम्परया वा यद् विशेषणं तत्सहितमिति तात्पर्यम् तेन नद्यास्तिष्ठति कूले इत्यादौ नद्या इत्यादेः समानवाक्यस्थत्वसिद्धिः । **पूर्वमीमांसादर्शनेष्येवमेव** विचारः– अर्थैक्यादे वाक्यं साकांक्षेचेद् विभागे स्यात् । **अमरसिंहेनापि** एतदेवाभिप्रेत्य कारकान्वितक्रियावाचकं सुबन्ततिङन्तचयान्यत वाक्यमिति विश्लेषितम् । तथा चोक्तं तेन–

"सुप्तिङन्तचयो वाक्यं क्रिया वा कारकान्विता" । अत्र वाशब्दः चेदर्थे, कारकं च तिङन्तवा तिरिक्तपदवाच्यं वेत्यन्यत् । एकस्य तत्त्ववारणाय सुबन्तचयेत्यादि । एतत् समानार्थकमेवाख्यातमिति स्पष्टमेव देवैकोद्देश्यकैकविधेय- कत्वगर्भमेक-वाक्यलक्षणं बोध्यम् । तदुक्तं **भर्तृहरिणा**–

**'साकांक्षावयवं भेदे परानाकांक्षशब्दकम् ।**
**क्रियाप्रधानं गुणवदेकार्थं वाक्यमुच्यते ॥**

चित्रस्यैकरूपस्य यथाभेदनिदर्शनैः
नीलादिभिः समाख्यानं क्रियते भिन्नलक्षणैः ॥
तथैवैकस्य वाक्यस्य निराकाङ्क्षस्य सर्वतः ।
शब्दान्तरैः समाख्यानं साकाङ्क्षैरनुगम्यते ॥ वाक्यपदीयम् 2-8/9

अत्र वाक्यमित्यस्यैकं वाक्यमित्यर्थः । **हेमचन्द्रेण** चोक्तम्-'सविशेषणमाख्यातं वाक्यम्' । सर्वे शब्दाः साक्षाद्रूपेण परम्परया वा क्रियाशब्दस्य एव विशेषतां प्रस्तुवन्ति । कारकं क्रियाविशेषणं क्रियाविशेषणमित्यादयो भेदास्तु अस्यैव व्याख्यानरूपाः । यदि संभ्रमादिवशात् क्रियापदस्य एकाधिकरूपेण प्रयोगः भवति तदापि एकस्याः एव क्रियायाः अभिधानकारणात् एकाधिकवारं प्रयोगः एक एव अनुमंस्यते तथा च एकतिङ् वाक्यम् इति वाक्यलक्षणविश्लेषणेन स्पष्टीभवति ।

**(4) एकतिङ्वाक्यम्' (सि.कौ.पृ.सं. 416 वा.सं.-1199) महा. 2.1.1**

तिङित्यनेन तिङन्तं विवक्षितम्। एकः तिङ् यस्येति विग्रहः । एकतिङ् वाक्यसंज्ञकं भवतीति वक्तव्यम् इति **महाभाष्ये** एतस्य विश्लेषणम् । तथा च एकं तिङन्तं वाक्यं कथ्यते इति तात्पर्यम् । अत्र एकशब्दः समानवचनः न तु संख्यार्थकः इति **कैयटाभिमतम्** । एवं च सः पदसमुदायः पदसमूहो वा वाक्यमभिधीयते यस्मिन् एका क्रिया साक्षात्रूपेण अध्याहारेण वा प्रकटिता भवेत् तथा अवशिष्टानि पदानि तस्याः क्रियायाः एव वैशिष्ट्यं प्रदर्शयन्ति । वाक्ये प्रयुक्तानां शब्दानां कृते त्रीणि तत्त्वानि सर्वथोपादेयानि भवन्ति–

1. वाक्यगतपदानामर्थानां सम्बन्धेषु कोऽपि बाधः न समागच्छेत् । यथा जलेन क्षेत्रं सिञ्चति इत्यस्मिन्नुदाहरणे सम्बन्धोऽयमबाधितः तिष्ठति । एवञ्चायं पदसमुदायः वाक्यम् । किन्तु वह्निना सिञ्चतीत्यत्र सम्बन्धोऽयं बाधितः तिष्ठति । अतः एकव्यापारबोधके सविशेषणक्रियापदे तिष्ठति सत्यपि पदसमुच्चयोऽयं वाक्यं कथ्यते ।

2. वाक्यगतानि पदानि परस्परं निरपेक्षाणि न भवेयुः प्रत्युत अन्योऽन्यं प्रति आकांक्षायुक्तानि भवेयुः, यथा बाणेन रामः बालिनं हन्ति, इत्यस्मिन् पदसमुच्चये प्रत्येकं शब्दः साकाङ्क्षःतिष्ठति अतः पदसमूहोऽयं वाक्यत्वं लभते । किन्तु रामः बाली हन्ति बाणः इति पदसमूहस्य पदानि केवलं निदर्शकविभक्तिभिः समन्वितत्वेन निराकांक्षाणि भवन्ति । अतः पदसमूहोऽयं वाक्यत्वेन न वरीवर्ति ।

3. वाक्यगतानि पदानि परस्परं समीपस्थानि स्युः । अर्थावबोधस्य प्रक्रियायां भिन्नत्वेन न तिष्ठेयुः । यथा-गिरिरग्निमान् दृश्यते, देवदत्तेन मोदको भुक्तः, अनयोः पदसमूहयोः पदानां सम्बन्धः अबाधितः तिष्ठति, पदानि परस्परं साकांक्षाणि समीपस्थानि च वर्तन्ते । एवमिदमुभयमपि वाक्यम् । परन्तु इहैव यदि व्यतिक्रमेण पाठः भवेत्-गिरिर्भुक्तः, मोदकोऽग्निमान् देवदत्तेन इति पदसमूहे यथायोग्यसम्बन्धार्थकविभक्तौ योग्यतायां च सत्यामपि विभक्तिभिः पदानामपेक्षितं नैकट्यं न विद्यते । अतः नेदं वाक्यम् ।

इदानीं पुनः प्रकृतमनुसरामः । वाक्यविचारविषये 'आख्यातं साव्ययकारकविशेषणं वाक्यम् एकतिङ्' वार्तिकस्य **कैयटकृतव्याख्यानं** विश्लेषयता **उद्योतकृता नागेशेन** कात्यायनस्य वार्तिकविषये अभिमतं स्पष्टीकृतम् । अतः यत्तु कैयटेनोक्तं 'तत्र लौकिकवाक्यग्रहणनिषेधार्थवाक्यं परिभाष्यते' तत्तु प्रमादादेवोक्तम् । यदपि आख्यातम् इह एकत्वविवक्षां विधाय पचति भवतीत्यत्र वाक्यत्वप्रतिषेधः तेन विहितः तदपि न, आख्यातत्वपर्याप्त्यधिकरणमेकमेवेति उक्तभाष्यरीत्या एकत्वविवक्षायाः फलाभावात् । किञ्च व्यक्तिपक्षे न ब्राह्मणं हन्यादित्यादौ एकं ब्राह्मणमहत्वा कृती स्यादिति भाष्योक्तन्यायेनेह एकत्वविवक्षायामेकस्यैवाख्यातस्य वाक्यत्वं बोधितं स्यात् न आख्यातानन्तरस्येति स्यात् । किञ्च अनया एकत्वविवक्षया समकक्षात् द्वित्वे पचति करोति चेत्यादौ तत्प्रतिषेधोऽपि विशेषणमादाय तद् वारणमशक्यं सविशेषणे आख्याते एकत्व-सत्त्वात् । एतेन च ब्रूहि ब्रूहि इत्यस्यापि असंग्रहः । विशेषणानुपादानेन विशेषणत्वाभावात्। वाक्यत्वफलन्तु 'मया किञ्चिद् वक्तव्यम्' इति प्रश्नोत्तरे अत्र आनन्त्यस्यापि प्रश्नाख्यानेत्यनेन

वाक्यस्य टेःप्लुतसिद्धिः । अतः **कात्यायनाचार्यः** स्वशास्त्रपरिभाषितं लक्षणमाह-एकतिङिति ।

संक्षेपतः इदं कथयितुं शक्यते यत् कात्यायनमते साव्ययं, सकारकं, सविशेषणं च आख्यातमथवा केवलमाख्यातमेव वाक्यं भवति । कात्यायनस्यापरं लक्षणं तिष्ठति एकतिङन्तयुक्तः पदसमूहः वाक्यमिति । आचार्यः अनुदात्तादीनां व्यवस्थार्थं एकस्मिन् वाक्ये एकमेव तिङन्तपदं मनुते, परिणामतः यत्र एकाधिकतिङन्तपदानि भविष्यति तत्र विभिन्नवाक्यानि भविष्यन्ति । मीमांसकानां मते अर्थस्य ऐक्ये सति वाक्यं भवति तथा च एकाधिकतिङन्तपदावस्थितिर्भवति तदापि तत्र एकवाक्यत्वस्वीकार एव स्यात् । शालीनां ते ओदनं दास्यामि इति एकतिङन्तयुक्तं वाक्यं कात्यायनमते मीमांसकानां च मते एकवाक्यत्वेन तिष्ठति किन्तु मीमांसकमते ओदनं पक्ष्यति भविष्यति इत्यत्र तिङन्तद्वये स्थितेऽपि एकवाक्यत्वमेव यतः अत्र प्रयोजनन्तु एकमेव किन्तु आचार्यकात्यायनमते वाक्यद्वयं यथात्र तिङन्तपदद्वयं तिष्ठति । भर्तृहरिमते सम्बोधनस्य क्रियाविशेषणत्वं तिष्ठति, अतः सम्बोधनस्य वाक्यत्वं सूपपन्नमेव । तत्त्वतः कात्यायनस्य 'एकतिङ्' इत्यस्य नेदं तात्पर्यं यत् एकस्मिन् वाक्ये एकैव मुख्या क्रिया स्थास्यति, यदि मुख्या क्रियैका तिष्ठेत् तदा वाक्यमपि एकमेव भविष्यति तिङन्तपदानां कापि संख्या तिष्ठेत्। यथा स्नाति पचति ततो व्रजति, अत्र व्रजति इति मुख्या क्रिया । किन्तु यदि वाक्ये मुख्या क्रिया एकाधिका तिष्ठेत् तदा तदनुरूपमेव वाक्यमपि विभिन्नं भविष्यति। कात्यायनवार्तिकानां विषयेऽस्मिन् परिशीलनेन ज्ञायते यत् कात्यायनात् पूर्वं सूत्रकारसमये वाक्यविचारस्य एका निश्चिता सरणिः नासीत् । पाणिनिसूत्रैः यः संकेतः उपलभ्यते तत्र ज्ञायते यत् तिङन्तपदस्य आख्यातस्य वा प्राधान्यमावश्यकं संजातं नेदं विवेचनस्यास्य तात्पर्यं यत् तिङन्तविहीनं वाक्यं तस्मिन् काले प्रचलितं नासीत् किन्तु इदं तु निश्चप्रचं यत् तदानीन्तने काले निश्चितार्थपरिज्ञानाय वाक्ये आख्यातस्य सत्ता आवश्यकी संजाता । एवं च यथा वाक्यस्य स्वरूपादिविवेचनस्य साक्षाद्रूपेण प्रथमः कात्यायनविहितः प्रयासः तथैव वाक्ये सौकर्येण अर्थावबोधाय तत्र आनुपूर्वी अपि अवश्यमेव तिष्ठति इति स्वीकरणमपि पाणिनि-कात्यायनसमये संयातं वाक्यपरिवर्तनं द्योतयति ।

**सन्दर्भ ग्रन्थसूची**


| | | |
|---|---|---|
| सिद्धान्तकौमुदी | - | भट्टोजिदीक्षितः |
| महाभाष्यम् | - | पतञ्जलिः |
| ऋग्वेद संहिता | - | |
| परमलघुमञ्जूषा | - | नागेशभट्टः |
| वाक्यपदीयम् | - | भर्तृहरिः |
| संस्कृत व्याकरणशास्त्रेतिहासः | - | युधिष्ठिर मीमांसकः |
| अष्टाध्यायी | - | पाणिनिः |
| लघुशब्देन्दुशेखरः | - | नागेशभट्टः |
| वार्तिकोन्मेषः | - | हेलाराजः |
| साहित्यदर्पणः | - | विश्वनाथः |
| व्याकरणवार्तिक एक समीक्षात्मक अध्ययन | - | पं. वेदपति मिश्रः |
| न्यायकारिका | | |
| माधवीयाधातुवृत्तिः | - | माधवाचार्यः |
| अमरकोषः | - | अमर सिंहः |